# पाठनरूपरेखा

Teaching Module -Sanskrit

## एककम् ५ संस्कृतिः ।

UNIT - V

## पाठः ५ सुयोधनस्य राजनीतिः(काव्यम्)

कालांशाः १६

Module 1

प्रसिद्धेषु पञ्चमहाकाव्येषु अन्यतमं भवति भारवेः किरातार्जुनीयम्। काव्यमिदं तु अर्थप्रधानात्मकं भवति। अतः भारवेरर्थगौरवम् इति प्रथाप्यस्ति। वनवास काले एकदा युधिष्ठिरेण नियुक्तः वनेचरः हस्तिनपुरीं गत्वा तत्र दुर्योधन शासनं कथमिति निरीक्ष्य पुनरागत्य युधिष्ठिराय विवृणोतीत्ययमेवात्र सन्दर्भः।

* किरातार्जुनीयस्य प्रतिपाद्यमधिकृत्य किञ्चिद्वक्तव्यम्।

### प्रवर्तनानि

संश्लिष्टपदचयनम्

इतरेभ्यः पाठेभ्यः समानसन्धियुक्तपदानां चयनाय निर्देशः।

वर्णानाम्( अक्षराणां ) संयोगः एव सन्धिः।

| संश्लिष्टपदचयनम् | सन्धिविच्छेदः |
|---|---|
| मानवीमगम्यरूपां | मानवीम् + अगम्यरूपां |
| कृतज्ञतामस्य | कृतज्ञताम् + अस्य |
| दिवमस्ततन्द्रिणा | दिवम् + अस्ततन्द्रिणा |
| परेतरानशङ्कितताकारम् | परेतरान् + अशङ्कितताकारम् |
| तथापि | तथा + अपि |
| सखीनिव | सखीन् + इव |
| आधिपत्यामिव | आधिपत्याम् + इव |
| क्वचिदुद्यतं | क्वचिद् + उद्यतं |
| अशङ्कितताकारमुपैति | अशङ्कितताकारम् + उपैति |
| समानमानान्सुहृदश्च | समानमानान् + सुहृदः+ च |
| सख्यमीयिवान्न | सख्यमीयिवान् + न |
| वाञ्छन्न | वाञ्छन् + न |
| रक्षान्परितः | रक्षान् + परितः |
| समुन्नयन्भूतिमनार्यसङ्गमाद्वरं | समुन्नयन् + भूतिम् +अनार्यसङ्गमाद् + वरम् |

Module 2

**पदार्थनिर्णयः**

पुस्तके प्रदत्तान् पदान् अक्षरमालाक्रमेण विन्यस्य तेषामर्थलेखनम्। सङ्घद्वयं कृत्वा पदार्थप्रश्नोत्तरी करणीया।अस्मिन् विभागे विभक्ति,लकार अव्ययादीनधिकृत्यापि प्रश्नाः पृष्टुं शक्यते।

मातृका-

भवतः इत्यस्य अर्थः कः? (त्वत्तः)

महीम् इत्यर्थयुक्तं पदम् किम्?(जगतीम्)

ईयिवस् शब्दस्य प्रथमा बहुवचनं किम्? (ईयिवांसः)

तनोतीति पदं कस्मिन् विभागे अन्तर्भवति? (परस्मैपदी)

विभागं कृत्वा इत्यस्य एकपदं कीदृशं पदं भवति? (ल्यबन्तमव्ययम्)

[Individual and Group work]

Module 3

**श्लोकानामालपनम्**

पाठ्यांशानां श्लोकानां विविधया रीत्या आलपनाय प्रेरयति।

| श्रद्धेयाः अंशाः। |
|---|
| अक्षरशुद्धिः,समीचीन पदच्छेदः,भावः |

[Individual and Group work]

Module 4

**आकाङ्क्षाप्रश्नानामुत्तरलेखनम्।**

क्रियापदमाधारीकृत्य आकाङ्क्षाद्योतक प्रश्नकरणमेव आकाङ्क्षाप्रश्नः।सङ्घद्वयं कृत्वा प्रश्नोत्तरीरूपेण कर्तुं शक्यते।

| श्रद्धेयाः अंशाः। |
|---|
| अक्षरशुद्धिः,उत्तरस्यौचित्यम् |

| खण्डान्वयरीतिर्भवति आकाङ्क्षाप्रश्नः। |
|---|

[Individual and Group work]

Evaluation

अन्वयलेखनम्।

Evaluation key

क्रियापदनिर्धारणम्,उचितप्रश्नः,उत्तरस्यौचित्यम्, अक्षरशुद्धिः,

क्रियापदानां चयनम्।

१.समीहते २.तनोति ३.वितन्यते

४.दर्शयते ५.बाधते ६.निहन्ति

७.वदन्ति ८.चकासति ९.उह्यते

Module 5

**टिप्पणीलेखनम्**

सुयोधनस्य शासनम्,आधुनिकप्रजाशासनं च अधिकृत्य टिप्पणीलेखनम्।

| श्रद्धेयाः अंशाः। |
| --- |
| आमुखम्, सन्दर्भकथनम्, विषयावतरणम्, तारतम्यं, उपसंहारः,आशयव्यक्तता,अक्षरशुद्धिः |

Module 6

**श्लोकविवेचनम्।**

निर्दिष्टाशययुक्तानां श्लोकानां चयनम्।

१.सुयोधनः नीतिपूर्वकशासनेन लोकं वशीकर्तुं इच्छति - [Sloka 1]

२.नयेन जयस्य प्रकारः - [Sloka 2]

३.पौरुषं नीतियुक्तम् अस्ति - [Sloka 3]

४.भृत्यादीन् प्रति अनुरागः - [Sloka 4]

५.सुयोधनः त्रिवर्गात् न प्रमादति-[Sloka 5]

६.सुयोधनस्य दण्डप्रकारः - [Sloka 6]

७.सुयोधनस्य भेदकौशलम्- [Sloka 7]

८.सुयोधनस्य जनपदक्षेमकरत्वम्- [Sloka 8]

९.सुयोधनस्य मित्रबलम् - [Sloka 9]

[Individual work]

प्रसिद्धेषु पञ्चमहाकाव्येषु अन्यतमं भवति भारवेः किरातार्जुनीयम्।

वनवासकाले एकदा युधिष्ठिरेण नियुक्तः वनेचरः हस्तिनपुरीं गत्वा तत्र दुर्योधनशासनं कथमिति निरीक्ष्य पुनरागत्य युधिष्ठिराय विवृणोतीत्ययमेवात्र सन्दर्भः।

दुर्योधनः सिंहासनस्थः अपि युधिष्ठिरात् पराजयं विशङ्क्य जनान् नीत्या वशीकर्तुं इच्छति।तदर्थं सः दयादाक्षिण्यादि गुणसम्पदा ऐश्वर्यं वर्धयन् स्वच्छं यशः तनोति।पुनः सः आलस्यं विना कर्मान् अहोरात्रं विभज्य पुरुषार्थः नयेन विस्तार्यते।भृत्येषु सखीदृष्ट्या, सुहृत्सु बान्धवदृष्ट्या,बन्धुषु सचिवाद्यधिकारदृष्ट्या च आदरं प्रकटयति।सः धर्मार्थकामयोः तुल्यानुरागेण तान् सेवते। जितेन्द्रियः,निरभिलाषः, विगतक्रोधःच सः गुरूपदिष्टदण्डोपायेन शत्रुमित्रभेदं विना सर्वान् समं दण्डयति।सर्वदा अपायशङ्कायुक्तोऽपि शङ्कारहित इव आचरति। निर्दिष्टकर्मणां निर्वाहान्ते भृत्यानुरूपं कृतज्ञतां प्रकटयति। तस्य शासनकाले राज्यम् अदेवमातृका भवति। अतःदेशः सर्वोत्कर्षेण वर्तते।सर्वथा तस्य गुणेभ्यः आकृष्टाः नृपाः तस्य आज्ञां शिरसा वहन्ति।

(एवम् आधुनिकप्रजाशासनस्यापि गुणदोषान् विविच्य लेखनीयम्)

| | |
|---|---|
| अलङ्कारसमन्वयः।<br>काव्यलिङ्गं,अर्थान्तरन्यासः,उत्पेक्षा इति त्रयः अलङ्काराः विद्यन्तेऽस्मिन् पाठे। | For details see TB pp 62,63 |
| वृत्तम्।<br>वंशस्थम्- जतौ तु वंशस्थमुदीरितं जरौ। यत्र ज - त - ज - र इति गणक्रमः भवति तत्र वंशस्थं नामक वृत्तं भवति।<br>आदिमध्यावसानेषु<br>भजसा यान्ति गौरवं<br>य र ता लाघवं यान्ति<br>मनौ तु गुरु लाघवम्। | संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रं।<br>विज्ञेयमक्षरं गुरु पादान्थस्थं विकल्पेन।।<br><br>आदिगुरुः - भ \| मध्यगुरुः - ज<br>अन्त्यगुरुः - स \| आदिलघुः - य<br>मध्यलघुः - र \| अन्त्यलघुः - त<br>सर्वगुरुः - म \| सर्वलघुः - न |

## मूल्यनिर्णयः

[Based on previous Questionpapers]

१ नराधिपाः दुर्योधनस्य गुणेषु आकृष्टाः आज्ञां माल्यमिव धारयति इत्याशययुक्तं श्लोकं चित्वा लिखत। 2

क) असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवा-
न्न बाधतेऽस्य त्रिगणः परस्परम्।।

ख) न तेन सज्यं क्वचिदुद्यतं
धनुः कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम्।। Ans: (ख)

२ सुयोधनस्य शानम् अधिकृत्य सूचनानुसारं लघूपन्यासं लिखत। 2

ऐश्वर्यवर्धनम्- पुरुषार्थ नयेन विस्तार्यते - मित्रभृत्यसचिवेषु परिगणना- सस्यविभवानां समृद्धिः- गुरूपदिष्टदण्डोपायस्वीकारः। Ans: See page 3

३ श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 5

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

क) कः समीहते?

ख) कां जेतुं समीहते?

ग) कथं जेतुं समीहते?

घ) सः कस्मात् पराभवं विशङ्कमानः?

ङ) द्यूतः इत्यर्थकं पदं किम्? Ans: See TB

४ सूचनाः उपयुज्य दुर्योधनस्य राज्यभरणं विवृणुत। 5

जयः-अनार्यसङ्गमः-षड्वर्गजयः-अतन्द्रिता-सखीवृत्तिः-समपक्षपाता-गुरूपदेशानुसारी।

Ans: See page 3

५ नराधिपः शासनं वहति इति कर्तरि प्रयोगः।

नराधिपेन शासनं उह्यते इति कर्मणि प्रयोगः।

एवं

गर्दभः भारं वहति इति वाक्यं कर्मणि परिणमयत। 1

६ पद्यं पठित्वा प्रश्नान् उत्तरयत। 5

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसङ्गमाद्वरं
विरोधोऽपि समं महात्मभिः।।

क) सः जिह्मः कः ?

ख) सः किं तनोति?

ग) कथं तनोति?

घ) वक्रःइत्यर्थे पद्ये प्रयुक्तं पदं किम्?

ङ) महात्मभिः सह विरोधः कस्मात् वरम्? Ans: See TB

७ श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 5

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरछद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

क) अस्मिन् पद्ये क्रियापदं किम्?

ख) वनाधिवासिनः कः?

ग) कथं जेतुं समीहते?

घ) भूमिः- अस्य समानार्थकं पदं श्लोकात् चित्वा लिखत?

ङ) जगतीं नयेन जेतुं कः समीहते? Ans: See TB

<table>
<tr><th colspan="3">प्रतिकरणपुटम्</th></tr>
<tr><td colspan="3">अनुभूताः क्लेशाः।</td></tr>
<tr><td>अध्यापकस्य</td><td>छात्राणाम्</td><td>परिहरणोपायानि</td></tr>
<tr><td></td><td></td><td></td></tr>
</table>